শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১০০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ১০০

*কেশাদিপাদৱর্ণনম্*

অগ্রে পশ্যামি তেজো নিবিডতর কলাযাৱলী লোভনীযং
পীযূষাপ্লাৱিতোহং তদনু তদুদরে দিৱ্যকৈশোরৱেষম্।
তারুণ্যারম্ভরম্যং পরমসুখরসাস্বাদরোমাঞ্চিতাঙগৈ-
রাৱীতং নারদাদ্যৈর্ৱিলসদুপনিষতসুন্দরীমণ্ডলৈশ্চ॥ ১ ॥

নীলাভং কুঞ্চিতাগ্রং ঘনমমলতরং সংযতং চারুভঙগ্যা
রত্নোত্তংসাভিরামং ৱলযিতমুদযচ্চন্দ্রকৈঃ পিঞ্ছজালৈঃ।
মন্দারস্রঙনিৱীতং তৱ পৃথুকবরীভারমালোকযেহং
স্নিগ্ধশ্বেতোর্ধ্বপুণ্ড্রামপি চ সুললিতাং ফালবালেন্দুৱীথীম্॥ ২ ॥

হৃদ্যং পূর্ণানুকম্পার্ণৱমৃদুলহরীচঞ্চলভ্রূৱিলাসৈ-
রানীলস্নিগ্ধপক্ষ্মাৱলিপরিলসিতং নেত্রযুগ্মং ৱিভো তে।
সান্দ্রচ্ছাযং ৱিশালারুণকমলদলাকারমামুগ্ধতারং
কারুণ্যালোকলীলাশিশিরিতভুৱনং ক্ষিপ্যতাং ময্যনাথে॥ ৩ ॥

উত্তুঙগোল্লাসিনাসং হরিমণিমুকুরপ্রোল্লসদ্গণ্ডপালী-
ৱ্যালোলতকর্ণপাশাঞ্চিতমকরমণীকুণ্ডলদ্বন্দ্বদীপ্রম্।
উন্মীলদ্দন্তপঙক্তিস্ফুরদরুণতরচ্ছাযবিম্বাধরান্তঃ
প্রীতিপ্রস্যন্দিমন্দস্মিতমধুরতরং ৱক্ত্রমুদ্ভাসতাং মে॥ ৪ ॥

বাহুদ্বন্দ্বেন রত্নোজ্জ্বলৱলযভৃতা শোণপাণিপ্রৱালে-
নোপাত্তাং ৱেণুনালীং প্রসৃতনখমযূখাঙগুলীসঙ্গশারাম্।
কৃত্বা ৱক্ত্রারৱিন্দে সুমধুরৱিকসদ্রাগমুদ্ভাৱ্যমানৈঃ
শব্দব্রহ্মামৃতৈস্তৱং শিশিরিতভুৱনৈঃ সিঞ্চ মে কর্ণৱীথীম্॥ ৫ ॥

www.prapatti.com

উতসর্পতকৌস্তুভশ্ৰীততিভিররুণিতং কোমলং কণ্ঠদেশং
বক্ষঃ শ্ৰীৱতসরম্যং তরলতরসমুদ্দীপ্রহারপ্রতানম্।
নানাৱর্ণপ্রসূনাৱলিকিসলযিনীং ৱন্যমালাং ৱিলোল-
ল্লোলম্বাং লম্বমানামুরসি তৱ তথা ভাৱযে রত্নমালাম্॥ ৬ ॥

অঙ্গে পঞ্চাঙ্গরাগৈরতিশযৱিকসতসৌরভাকৃষ্টলোকং
লীনানেকত্রিলোকীৱিততিমপি কৃশাং বিভ্রতং মধ্যৱল্লীম্।
শক্রাশ্মন্যস্ততপ্তোজ্জ্বলকনকনিভং পীতচেলং দধানং
ধ্যাযামো দীপ্তরশ্মিস্ফুটমণিরশনাকিঙ্কিণীমণ্ডিতং ত্বাম্॥ ৭ ॥

ঊরূ চারূ তৱোরূ ঘনমসৃণরুচৌ চিত্তচোরৌ রমাযাঃ
ৱিশ্বক্ষোভং ৱিশঙ্ক্য ধ্রুৱমনিশমুভৌ পীতচেলাৱৃতাঙ্গৌ।
আনম্রাণাং পুরস্তান্ন্যসনধৃতসমস্তার্থপালীসমুদ্গ-
চ্ছাযং জানুদ্ৱযং চ ক্রমপৃথুলমনোজ্ঞে চ জঙ্ঘে নিষেৱে॥ ৮ ॥

মঞ্জীরং মঞ্জুনাদৈরিৱ পদভজনং শ্রেয ইত্যালপন্তং
পাদাগ্রং ভ্রান্তিমজ্জতপ্রণতজনমনোমন্দরোদ্ধারকূর্মম্।
উত্তুঙ্গাতাম্ররাজন্নখরহিমকরজ্যোতস্নযা চাশ্রিতানাং
সন্তাপধৱান্তহন্ত্রীং ততিমনুকলযে মঙ্গলামঙ্গুলীনাম্॥ ৯ ॥

যোগীন্দ্রাণাং ত্বদঙ্গেষ্ৱধিকসুমধুরং মুক্তিভাজাং নিৱাসো
ভক্তানাং কামৱর্ষদ্যুতরুকিসলযং নাথ তে পাদমূলম্।
নিত্যং চিত্তস্থিতং মে পৱনপুরপতে কৃষ্ণ কারুণ্যসিন্ধো
হৃত্বা নিশশেষতাপান্ প্রদিশতু পরমানন্দসন্দোহলক্ষ্মীম্॥ ১০ ॥

অজ্ঞাত্বা তে মহত্ত্বং যদিহ নিগদিতং ৱিশ্বনাথ ক্ষমেথাঃ
স্তোত্রং চৈততসহস্রোত্তরমধিকতরং ত্বতপ্রসাদায ভূযাত্।
দ্ৱেধা নারাযণীযং শ্রুতিষু চ জনুষা স্তুত্যতাৱর্ণনেন
স্ফীতং লীলাৱতারৈরিদমিহ কুরুতামাযুরারোগ্যসৌখ্যম্॥ ১১ ॥

★★★★★★★★★★



www.prapatti.com